श्री गुह्यकाळी वज्र कवचं (विश्वमंगळं)

श्री गुह्यकाळी वज्र कवचं (विश्वमंगळं)

अस्य विश्वमंगळं नाम श्री गुह्यकाळी महावज्रकवचस्य संवर्त ऋषिः अनुष्टुप् छंदः, एकवक्त्रादि शतवक्त्रांता गुह्यकाळी देवता, फ्रें बीजं, स्फ्रें शक्तिः, छ्रीं कीलकं सर्वाभीष्टसिद्धि पूर्वक आत्मरक्षणे जपे विनियोगः ||

ॐ फ्रें पातु शिरः सिद्धिकराळी काळिका मम |
ह्रीं छ्रीं ललाटं मे सिद्धिविकराळि सदाऽवतु || 1 ||

श्रीं क्लीं मुखं चंडयोगेश्वरी रक्षतु सर्वदा |
हूं स्त्रीं कर्णौ वज्रकापालिनी मे काळिकाऽवतु || 2 ||

ऐं क्रौं हनू कालसंकर्षणा मे पातु काळिका |
क्रीं क्रौं भ्रुवावुग्रचंडा काळिका मे सदाऽवतु || 3 ||

हां क्ष्रौं नेत्रे सिद्धिलक्ष्मीरवतु प्रत्यहं मम |
हूं ह्रौं नासां चंडकापालिनी मे सर्वदाऽवतु || 4 ||

आं ईं ओष्ठाधरौ पातु सदा समयकुब्जिका |
ग्लूं ग्लौं दंतान् राजराजेश्वरी मे रक्षतात् सदा || 5 ||

जूं सः सदा मे रसनां पातु श्रीजयभैरवी |
स्फ्रें स्फ्रें पातु स्वर्णकूटेश्वरी मे चिबुकं सदा || 6 ||

ब्लूं ब्लौं कंठं रक्षतु मे सर्वदा तुंबुरेश्वरी |
क्ष्रूं क्ष्रौं मे राजमातंगी स्कंधौ रक्षतु सर्वदा || 7 ||

फ्रां फ्रौं भुजौ वज्रचंडेश्वरी रक्षतु मे सदा |
स्त्रें स्त्रौं वक्षःस्थलं पातु जयझंकेश्वरी मम || 8 ||

फिं फां करौ रक्षतु मे शिवदूती च सर्वदा |
छ्रैं छ्रौं मे जठरं पातु फेत्कारी घोरराविणी || 9 ||

स्त्रैं स्त्रौं गुह्येश्वरि नाभिं मम रक्षतु सर्वदा |
क्ष्रुं क्ष्रौं पार्श्वौ सदा पातु बाभुवी घोररूपिणी || 10 ||

ग्रूं ग्रौं कुलेश्वरी पातु मम पृष्ठं च सर्वदा |
क्लूं क्लौं कटिं रक्षतु मे भीमादेवी भयानका || 11 ||

हैं हौं मे रक्षतादूरू सर्वदा चंडखेचरी |
स्फ्रों स्फ्रौं मे जानुनी पातु कोरंगी भीषणानना || 12 ||

त्रीं श्रीं जंघायुगं पातु तामसी सर्वदा मम |
ज्रैं ज्रौं पादौ महाविद्या सर्वदा मम रक्षतु || 13 ||

ड्रीं ठ्रीं वागीश्वरी सर्वान् संधीन् देहस्य मेऽवतु |
ख्रें ख्रौं शरीरधातून्मे कामाख्या सर्वदाऽवतु || 14 ||

ब्रीं ब्रूं कात्यायनी पातु दशवायूंस्तनूद्भवान् |
ज्लूं ज्लौं पातु महालक्ष्मीः खान्येकादश सर्वदा || 15 ||

ऐं औं अनूक्तं यत् स्थानं शरीरेऽंतर्बहिश्च मे |
तत्सर्वं सर्वदा पातु हरसिद्धा हरप्रिया || 16 ||

फ्रें छ्रीं ह्रीं स्त्रीं हूं शरीरसकलं सर्वदा मम |
गुह्यकाळी दिवारात्रौ संध्यासु परिरक्षतु || 17 ||

इति ते कवचं प्रोक्तं नाम्ना च विश्वमंगळं |
सर्वेभ्यः कवचेभ्यस्तु श्रेष्ठं सारतरं परं || 18 ||

इदं पठित्वा त्वं देहं भस्मनैवावगुंठ्य च |
तत्तत् स्थानेषु विन्यस्य बद्धवादः कवचं दृढं || 19 ||

दशवारान् मनुं जप्त्वा यत्र कुत्रापि गच्छतु |
समरे निपतच्छस्त्रेऽरण्ये स्वापदसंकुले || 20 ||

श्मशाने प्रेतभूताढ्यकांतारे दस्युसंकुले |
राजद्वारे सपिशुने गह्वरे सर्पवेष्टिते || 21 ||

तस्य भीतिर्न कुत्रापि चरतः पृथिवीमिमां |
न च व्याधिभयं तस्य नैव तस्करजं भयं || 22 ||

नाग्न्युत्पातो नैव भूतप्रेतजः संकटस्तथा |
विद्युद्वर्षोपलभयं न कदापि प्रबाधते || 23 ||

न दुर्भिक्षभयं चास्य न च मारिभयं तथा |
कृत्याभिचारजा दोषाः स्पृशंत्येनं कदापि न || 24 ||

सहस्रं जपतश्चास्य पुरश्चरणमुच्यते |
तत्कृत्वा तु प्रयुंजीत सर्वस्मिन्नपि कर्मणि || 25 ||

वश्यकार्यो मोहने च मारणोच्चाटने तथा |
स्तंभने च तथा द्वेषे तथा कृत्याभिचारयोः || 26 ||

दुर्गभंगे तथा युद्धे परचक्र निवारणे |
एतत् प्रयोगात् सर्वाणि कार्याणि परिसाधयेत् || 27 ||

भूतावेशं नाशयति विवादे जयति द्विषः |
संकटं तरति क्षिप्रं कलहे जयमाप्नुयात् || 28 ||

यदीच्छेत् महतीं लक्ष्मीं तनयानायुरेव च |
विद्यां कांतिं तथौन्नत्यं यशं आरोग्यमेव च || 29 ||

भोगान् सौख्यं विघ्नहानिमनालस्यं महोदयं |
अधीहि कवचं नित्यममुनामुंच च प्रिये || 30 ||

कवचेनामुना सर्वं संसाधयति साधकः |
यद्यद्ध्यायति चित्तेन सिद्धं तत्तत्पुरः स्थितं || 31 ||

दुर्धटं घटयत्येतत् कवचं विश्वमंगळं |
विश्वस्य मंगळं यस्मादतो वै विश्वमंगळं || 32 ||

सान्निध्यकारकं गुह्यकाळ्या एतत् प्रकीर्तितं |
भुक्त्वा भोगानघं हत्वा देहांते मोक्षमाप्नुयात् || 33 ||

इति श्री गुह्यकाळी विश्वमंगळ कवचं ||